शङ्कर भक्त सभा ट्रस्ट्
वेदभवनम्

यजुर् उपाकर्मा

Sankara Bhaktha Sabha Trust
Vedabhavan,
58-59, Road No.1, Chandragiri Colony, Neredmet, Secunderabad - 56
Ph: 040 - 27227669 / 27229775

Website: www.vedabhavan.org
Email : vedabhavan@gmail.com, ghanapati@gmail.com

Subscribe to our Facebook Page
Facebook: http://facebook.com/vedabhavan

श्री महागणपतये नमः

।। समिदाधानम् ।।

शुक्लाम्बरधरं विष्णुं शशिवर्णं चतुर्भुजम् ।
प्रसन्नवदनं ध्यायेत् सर्वविघ्नोपशान्तये ।।

ओं भूः। ओं भुवः। ओ३म् सुवः। ओं महः। ओं जनः। ओं तपः। ओ३सत्यम्।। ओं तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि। धियो यो नः प्रचोदयात् ।। ओमापो ज्योती रसोऽमृतं ब्रह्म भूर्भुवस्सुवरोम् ।।

ममोपात्त-समस्त-दुरित-क्षय-द्वारा श्री-परमेश्वर-प्रीत्यर्थं प्रातः समिदाधानं (सायं समिदाधानं) करिष्ये । (लौकिकाग्निं प्रतिष्ठाप्य। अग्निमिध्वा । प्रज्वाल्य।।)

परित्वाग्ने परिमृजाम्यायुषा च धनेन च । सुप्रजाः प्रजया भूयासं सुवीरो वीरैस्सुवर्चा वर्चसा, सुपोषः पोषै-स्सुगृहो गृहै-स्सुपतिः पत्या सुमेधा मेधया सुब्रह्मा ब्रह्मचारिभिः। (तूष्णीं पिरषिच्य । अथ समिधमादधाति ।।)

अग्नये समिध-माहाऋषं बृहते जातवेदसे। यथात्वमग्ने समिधा समिध्यस एवं मामायुषा वर्चसा सन्यामेधया प्रजया पशुभि-र्ब्रह्मवर्चसेनान्नाद्येन समेधय स्वाहा। एधोस्येधिषीमहि स्वाहा । समिदसि समेधिषीमहि स्वाहा । तेजोऽसि तेजो मयि धेहि स्वाहा । अपो अद्यान्वचारिष३रसेन समसृक्ष्महि। पयस्वा३अग्न आगमं तम्मा स३सृज वर्चसा स्वाहा । संमाग्ने वर्चसासृज प्रजया च धनेन च स्वाहा । विद्युन्मे अस्य देवा इन्द्रो विद्यात् सहऋषिभिस्स्वाहा। अग्नये बृहते नाकाय स्वाहा। द्यावापृथिवीभ्या३स्वाहा । एषा ते अग्ने समित्तया वर्धस्व चाप्यायस्व च तयाहं वर्धमानो भूयासमाप्यायमानश्च स्वाहा। यो माग्ने भागिन३सन्तमथाभागं चिकीर्षति। अभागमग्ने तं कुरु मामग्ने भागिनं कुरु स्वाहा । समिधमाधायाग्ने सर्वव्रतो भूयास३स्वाहा । (अथ तूष्णीं समन्तं परिषिच्य) स्वाहा । उपस्थानं करिष्ये ।।

यत्ते अग्ने तेजस्तेनाहं तेजस्वी भूयासं, यत्ते अग्ने वर्चस्तेनाहं वर्चस्वी भूयासं, यत्ते अग्ने हरस्तेनाहं हरस्वी भूयासं ।। मयि मेधां मयि प्रजां मय्यग्निः तेजो दधातु, मयि मेधां मयि प्रजां मयीन्द्र इन्द्रियं दधातु, मयि मेधां मयि प्रजां मयि सूर्यो भ्राजो दधातु ।। अग्नये नमः । मन्त्रहीनं क्रियाहीनं भक्तिहीनं हुताशन । यद्धुतं तु मया देव परिपूर्णं तदस्तु ते ।। प्रायश्चित्तान्यशेषाणि तपः-कर्मात्मकानि वै । यानि तेषा-मशेषाणां कृष्णानुस्मरणं परम् ।। (अभिवाद्य)

(होमभस्म संगृह्य । वामकरतले निधाय । अद्भिस्सेचयित्वा ।। अनामिकया पेषयित्वा ।।) मानस्तोके तनये मान आयुषि मा नो गोषु मानो अश्वेषु रीरिषः । वीरान्मानो रुद्र भामितो वधीर्हविष्मन्तो नमसा विधेमते ।। मेधावी भूयासम् (ललाटे) । तेजस्वी भूयासम् (दक्षिणबाहौ)। वर्चस्वी भूयासम् (सव्येबाहौ)। ब्रह्मवर्चसी भूयासम् (हृदये) । आयुष्मान् भूयासम् (कण्ठे)। अन्नादो भूयासम् (नाभौ)। स्वस्ति भूयासम् (शिरसि)।।

श्रद्धां मेधां यशः प्रज्ञां विद्यां बुद्धिं श्रियं बलम् । आयुष्यं तेज आरोग्यं देहि मे हव्यवाहन । श्रियं देहि मे हव्यवाहन ओं नम इति ।।

कामोकार्षीत्जप संकल्पः

आचम्य, पवित्रपाणिः । शुक्लाम् ...... शान्तये | ओम् भूः ...... सुवरोम् | ममोपात्त ...... प्रीत्यर्थम् | शुभे शोभने मुहूर्त्ते आद्यब्रह्मणः द्वितीय परार्धे श्वेत वराह कल्पे वैवस्वत मन्वन्तरे, अष्टा विम्शति तमे, कलियुगे, प्रथमे पादे जम्बूद्वीपे भारत वर्षे भरतकण्ठे मेरोः दक्षिणे पार्श्वे शकाब्दे अस्मिन् वर्तमाने व्यावहारिके प्रभवादि षष्ठि सम्वत्सराणाम् मध्ये **हेमलम्ब नाम सम्वत्सरे दक्षिणायने वर्षऋतौ भाद्रपद मासे शुक्ल पक्षे पौर्णमास्याम् शुभतितौ सौम्यवासर युक्तायां शतभिषक् नक्षत्र युक्तायां धृति नाम योग भवकरण युक्तायां एवङ्गुण विशेषण विशिष्टायां अस्यां पौर्णमास्याम्**, शुभतिथौ ममोपात्त....प्रीत्यर्थं तैष्यां पौर्णमास्यां अध्यायोत्सर्जन अकरण प्रायश्चित्तार्थं अष्टोत्तर सहस्र सङ्क्यया (शत सङ्ख्यया) कामोकार्षीत् मन्युरकार्षीत् इति महामन्त्रजपं करिष्ये । इति संकल्प्य ।। 'कामोकार्षीत् मन्युरकार्षीत् ' इति जपित्वा । माध्याह्निकं ब्रह्मयज्ञं च कृत्वा ।।

।। ब्रह्मयज्ञः ।।

आचम्य

शुक्लांबरधरं .....शान्तये ।। प्राणानायम्य । ओं भूः .... भूर्भुवस्सुवरोम् । ममोपात्त-समस्त-दुरितक्षयद्वारा श्रीपरमेश्वरप्रीत्यर्थं ब्रह्मयज्ञं करिष्ये । ब्रह्मयज्ञेन यक्ष्ये ।।

विद्युदसि विद्य मे पाप्मान-मृतात् सत्यमुपैमि । (हस्तावनिज्य। त्रिराचामेत्। द्विः परिमृज्य । सकृदुपस्पृस्य । शिरश्चक्षुषी नासिके श्रोत्रे हृदयमालभ्य।

ओं भूः, तत्सवितुर्वरेण्यम् । ओं भुवः, भर्गो देवस्य धीमहि । ओं॑सुवः, धियो यो नः प्रचोदयात् ।। ओं भूः तत्सवितुर्वरेण्यम् भर्गोदेवस्य धीमहि । ओं भुवः, धियो यो नः प्रचोदयात् । ओं॑सुवः, तत्सवितुर्वरेण्यं भर्गो देवस्य धीमहि, धियो यो नः प्रचोदयात् ।

हरिःओम् । अग्निमीळे पुरोहितं, यज्ञस्य देवमृत्विजम् । होतारं रत्नधातमम् । हरिः ओम् । हरिः ओम् । इषे त्वोर्जे त्वा वायवस्थोपायवस्थ, देवोवस्सविता प्रार्पयतु श्रेष्ठतमाय कर्मणे । हरिः ओम् । हरिः ओम् । अग्न आयाहि वीतये गृणानो हव्यदातये । नि होता सत्सि बर्हिषि । हरिः ओम् । हरिः ओम् । शन्नो देवीरभिष्टय आपो भवन्तु पीतये । शं योरभिस्रवन्तु नः। हरिः ओम्।

ओं भूर्भुवस्सुवः । सत्यं तपः श्रद्धायां जुहोमि । ओं नमो ब्रह्मणे नमो अस्त्वग्नये नमः पृथिव्यै नम ओषधीभ्यः । नमो वाचे नमो वाचस्पतये नमो विष्णवे बृहते करोमि । (एवं त्रिः)।

वृष्टिरसि वृश्चमे पाप्मानं ऋतात् सत्यमुपागाम् । (हस्तावविनज्य) देवर्षि-पितृ-तर्पणं करिष्ये ।

देव तर्पणम्

ब्रह्मादयो ये देवास्तान् देवागु॑स्तर्पयामि । सर्वान् देवागु॑स्तर्पयामि । सर्वदेवगणा॑स्तर्पयामि । सर्वदेवपत्नीस्तर्पयामि । सर्वदेवगणपत्नीस्तर्पयामि ।

ऋषि तर्पणम्

निवीति। कृष्णद्वैपायनादयो ये ऋषयस्तान् ऋषीꣳस्तर्पयामि । सर्वान् ऋषीꣳस्तर्पयामि । सर्वर्षिगणाꣳस्तर्पयामि । सर्वर्षिपत्नीस्तर्पयामि । सर्वर्षिगणपत्नीस्तर्पयामि । प्रजापतिं काण्डऋषिं तर्पयामि । सोमं काण्डऋषिं तर्पयामि । अग्निं काण्डऋषिं तर्पयामि । विश्वान् देवान् काण्डऋषीꣳस्तर्पयामि । साꣳहितीर्देवता उपनिषदस्तर्पयामि । याज्ञिकीर्देवता उपनिषदस्तर्पयामि । वारुणीर्देवता उपनिषदस्तर्पयामि । हव्यवाहं तर्पयामि । विश्वान् देवान् काण्डऋषीꣳस्तर्पयामि । ब्रह्माणं स्वयंभुवं तर्पयामि । विश्वान् देवान् काण्डऋषीꣳस्तर्पयामि । अरुणान् काण्डऋषीꣳस्तर्पयामि । सदसस्पतिं तर्पयामि । ऋग्वेदं तर्पयामि । यजुर्वेदं तर्पयामि । सामवेदं तर्पयामि । अथर्ववेदं तर्पयामि । इतिहासपुराणं तर्पयामि । कल्पं तर्पयामि ।

पितृ तर्पणं

(प्राचीनावीति) । सोमः पितृमान् यमोऽङ्गिरस्वान् अग्निकव्यवाहनादयो ये पितरस्तान् पितॄꣳस्तर्पयामि । सर्वान् पितॄꣳस्तर्पयामि । सर्वपितृगणाꣳस्तर्पयामि । सर्वपितृ-पत्नी-स्तर्पयामि । सर्वपितृ-गणपत्नीस्तर्पयामि । ऊर्जं वहन्तीरमृतं घृतं पयः कीलालं परिस्रुतꣳस्वधास्थ तर्पयत मे पितॄन् । तृप्यत,तृप्यत,तृप्यत । उपवीती । आचामेत् ।।

।। महासंकल्पः ।।

शुक्लां........शान्तये । ओम् भूः....भूर्भूवस्सुवरों । ममोपात्त समस्त दुरितक्षयद्वारा श्री परमेश्वरप्रीत्यर्थम् । तदेव लग्नं सुदिनं तदेव ताराबलं चन्द्रबलं तदेव । विद्याबलं दैवबलं तदेव लक्ष्मीपतेरङ्घ्रियुगं स्मरामि । ओं अपवित्रः पवित्रो वा सर्वावस्थां गतोपिवा । यस्मरेत् पुण्डरीकाक्षं सबाह्याभ्यन्तरः शुचिः । मानसं वाचिकं पापं कर्मणा समुपार्जितम् । श्री रामः स्मरणेनैव व्यपोहति न संशयः । श्रीराम राम राम । तिथिर्विष्णुः तथावारः नक्षत्रं विष्णुरेव च । योगश्च करणञ्चैव सर्वं विष्णुमयं जगत् । श्री गोविन्द गोविन्द गोविन्द । अद्य श्री भगवतः आदिविष्णोः आदिनारायणस्य अचिन्त्यया अपरिमितया शक्त्या भ्रियमाणस्य महाजलौघस्य मध्ये परिभ्रमतां अनेककोटि ब्रह्माण्डानां एकतमे अव्यक्त महत् अहङ्कार पृथिव्यप्तेजोवाय्वाकाशाद्यैः आवरणैः आवृतेऽस्मिन् महति ब्रह्माण्डकरण्डमण्डले आधार शक्ति कूर्म अनन्तादि अष्टदिग्गजोपरि प्रतिष्ठितस्य उपरितले सत्यादि लोकषट्कस्य अधोपाके महानालायमान फणिराज शेषस्य सहस्रफणामणि मण्डलमण्डिते लोकालोक अचलेन परिवृते दिग्दन्ति शुण्डादण्ड उत्तम्भिते लवण इक्षु सुरासर्पि दधि, दुग्ध, शुद्धार्णवैः परिवृते जम्पू प्लक्ष शाल्मलि कुश क्रौञ्च शाक, पुष्कराख्य, सप्तद्वीपदीपिते इन्द्र, कशेरु, ताम्र, गभस्ति नाक, सौम्य गन्धर्व चारण, भारतादि नवखण्ठात्मके महामेरु, गिरि, कर्णिका, उपेते महा, सर, उरुहायमाण पञ्चाशत्, कोटि, योजन, विस्तीर्ण, भूमण्डले, सुमेरु, निषत, हेमकूट, हिमाचल, माल्यवत् पारियात्रक गन्धमादन कैलास, विन्ध्याचलादि, महाशैल, अधिष्टिते, लवण, समुद्र, मुद्रिते, भारत, किम्पुरुष, हरि, इळावृत, रम्यक, हिरण्मय, गुरुभद्राश्व, केतुमालाख्य, नव, वर्ष, उपशोभिते, जम्बूद्वीपे, भारतवर्षे, भरतखण्डे, मेरोः दक्षिणेपार्श्वे, कर्मभूमौ, स्वाम्य वन्ति कुरुक्षेत्रादि समभू मध्यरेखायाः पूर्वदिक्भागे विन्ध्याचलस्य दक्षिणदिक्भागे, दण्डकारण्ये गोदावर्याः दक्षिणे तीरे सकलजगत् स्रष्टुः परार्धद्वय जीविनः ब्रह्ममणः प्रथमपरार्थे पञ्चाशदब्दात्मके अतीते पञ्चाशदब्दादौ प्रथमेवर्षे प्रथमे मासे प्रथमे पक्षे प्रथमे दिवसे अहनि द्वितीये यामे तृतीये मूहूर्ते स्वायम्भुव स्वारोचिष उत्तम तामस रैवत चाक्षुषाख्येषु षट्सु मनुषु व्यतीतेषु सप्तमे वैवस्वत मन्वन्तरे अष्टाविंशतितमे वर्तमाने कलियुगे शालिवाहन शकाब्दे प्रभवादीनां षष्ट्याः सम्वत्सराणां मध्ये **हेमलम्ब नाम सम्वत्सरे दक्षिणायने वर्षऋतौ भाद्रपद मासे शुक्ल पक्षे पौर्णमास्याम् शुभतितौ सौम्यवासर युक्तायां शतभिषक् नक्षत्र युक्तायां धृति नाम योग भवकरण युक्तायां एवङ्गुण विशेषण विशिष्टायां अस्यां पौर्णमास्याम्**, शुभतिथौ ममोपात्त समस्त दुरित क्षयद्वारा श्री परमेश्वर प्रीत्यर्थं अनादि अविद्यावासनया प्रवर्तमाने अस्मिन् महति सम्सारचक्रे विचित्राभिः

कर्मगतिभिः विचित्रासु योनिषु पुनःपुनः अनेकधा जनित्वा केनापि पुण्यकर्म विशेषेण इदानींतन मानुष्ये द्विज जन्म विशेषं प्राप्तवतः मम इहजन्मनि पूर्वजन्मनि जन्म जन्मान्तरेषु च बाल्ये वयसि कौमारे यौवने वार्धक्ये च जाग्रत् स्वप्न सुषुप्ति अवस्थासु मनो वाक्काय कर्मेन्द्रिय ज्ञानेन्द्रिय व्यापारैः सम्भावितानां उपपातकानां सङ्कलीकरणानां मलिनीकरणानां अपात्रीकरणानां जाति भ्रम्शकराणां प्रकीर्णकानां एवं नवानां नवविधानां बहूनां बहुविधानां सर्वेषां पापानां सद्यः अपनोदनद्वारा समस्त पापक्षयार्थं समस्त हरिहर देवता सन्निधौ दैवब्राह्मण सन्निधौ **भाद्रपद्याम्** पौर्णमास्यां अध्यायोपाकर्मकर्मकरिष्ये तदङ्गं माध्यान्हिक स्नानं करिष्ये।

प्रार्थनैः अतिक्रूर महाकाय कल्पान्त दहनोपम । भैरवाय नमस्तुभ्यं अनुज्ञां दातुमर्हसि । दुर्भोजन दुरालाप दुष्प्रतिग्रह सम्भवम् । पापं हर मम क्षिप्रं सह्यकन्ये नमोस्तुते । त्रिरात्रं जाह्नवीतीरे पाञ्चरात्रन्तु यामुने । सद्यः पुनातु कावेरी पापं आमरणन्तिकम् । गङ्गा गङ्गेति योब्रूयात् योजनानां शतैरपि । मुच्यते सर्वपापेभ्यो विष्णुलोकं स गच्छति ।।

यज्ञोपवीतधारणमन्त्रम्

शुक्लांबरधरं.... । प्राणानायम्य ।। ममोपात्त.... परमेश्वरप्रीत्यर्थं श्रौतस्मार्थ-विहित-नित्यकर्मानुष्ठानयोग्यता-सिद्ध्यर्थं यज्ञोपवीतधारणं करिष्ये । 'यज्ञोपवीतं' इति महामन्त्रस्य , परब्रह्मऋषिः त्रिष्टुप्छन्दः, परमात्मा देवता, यज्ञोपवीतधारणे वियोगः ।।

यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् । आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः । *इति सन्धार्य* ।।

उपवीतं भिन्नतन्तुं जीर्णं कश्मलदूषितम् । विसृजामि पुनर्ब्रह्मन् वर्चो दीर्घायुरस्तु मे । आचम्य ।। *ब्रह्मचारिणस्तु मौंजी-मजिनं दण्डं च मन्त्रेण धारयेत्* ।।

काण्ड-ऋषि-तर्पणम्

अथ पवित्रपाणिः (सर्वे) प्राणानायम्य । **भाद्रपद्याम्** पौर्णमास्यां अध्यायोपक्रम-कर्माङ्गम् काण्डऋषि-तर्पणं करिष्ये ।। निवीति । तिलाक्षत-युक्तादि्भ-स्तर्पयति । ऋषितीर्थेन ।।

प्रजापतिं-काण्डऋषिं तर्पयामि । (त्रिः) । सोमं, अग्निं काण्डऋषिं तर्पयामि । विश्वान् देवान् काण्डऋषीꣳस्तर्पयमि । साꣳहिती-देवता उपनिषदः तर्पयामि। याज्ञिकीर्देवता उपनिषधः तर्पयामि। वारुणीर्देवता उपनिषदः तर्पयामि। ब्रह्माणं स्वयंभुवं तर्पयामि । सदसस्पतिं तर्पयामि ।। उपवीति ।। आचम्य ।।

वेदारम्भं

शुक्लाम्...शान्तये...ओम्...भूः...भुर्भुवसुवरोम् अद्य पूर्वोक्त एवङ्गुण विशेषण विशिष्टायामस्यां पौर्णमास्यां शुभतिथौ ममोपात्त समस्त दुरितक्षयद्वारा श्री परमेश्वर प्रीत्यर्थं **भाद्रपद्याम्** पौर्णमास्यां अध्यायोपाकर्माङ्गं अध्ययनारम्भं करिष्ये (अपउप स्पृश्य)

ओं श्री गुरुभ्यो नमः हरि ओम्

गणानान्त्वा गणपतिं हवामहे कविं कवीनां उपमश्रवस्तमम् । ज्येष्ठराजं ब्रह्मणां ब्रह्मणस्पते आ नः श्रृण्वन्नूतिभिः सीद सादनम् ।

हरिः ओं इषेत्वा ऊर्जेत्वा वायवस्थ उपायवस्थ देवो वःसविता प्रार्पयतु श्रेष्ठतमाय कर्मणे आप्यायध्वम् अघ्नियाः देवभागं ऊर्जस्वतीः पयस्वतीः प्रजावतीः अनमीवाः अयक्ष्मा मावः स्तेनईशत माघस ँसः रुद्रस्यहेतिः परिवः वृणक्तु ध्रुवाः अस्मिन् गोपतौस्यात बह्वीः यजमानस्य पशून्पाहि । हरिः ओम् ।

हरिः ओम् ब्रह्म सन्धत्तं तन्मे जिन्वतं हरिः ओम्।

भद्रं कर्णेभिः श्रृणुयामदेवाः ....ददातु हरिः ओम्।

हरिःओम् संज्ञानं विज्ञानं प्रज्ञानं जानत् अभिजानत् । सङ्कल्पमानं प्रकल्पमानं उपकल्पमानं उपक्लुप्तं क्लुप्तं हरिः ओम्।।

हरिः ओम् प्रसुग्मन्ता धियसानस्य सक्षणि वरेभिः वरान् अभिसुप्रसीदत । अस्माकं इन्द्रः उभयं जुजोषति यत्सौम्यस्य अन्धसः बुबोधति हरि ओम् ।

हरिः ओम् अग्निमीळे पुरोहितं यज्ञस्य देवं ऋत्विजम् । होतारं रत्न धातमं हरिः ओम् ।

हरिः ओम् अग्न आयाहि वीतये गृणानः हव्यदातये । निहोता सत्सि बर्हिषि हरिः ओम् ।

हरिः ओम् शन्नो देवीः अभिष्टये आपोभवन्तु पीतये शम्योः अभिस्रवन्तुनः हरिः ओम् ।

हरिः ओम् अथातः दर्शपूर्णमासौ व्याख्यास्यामः प्रातः अग्निहोत्रं हुत्वा अन्यं आहवनीयं प्रणीय अग्नीन् अन्वादधाति हरिः ओम् ।

हरिः ओम् अथकर्माणि आचाराद्यानि गृह्यन्ते । उदगयन पूर्वपक्षाहः पुण्याहेषु कार्याणि । यज्ञोपवीतिनाप्रदक्षिणं

हरिः ओम् हरिः ओम् अथ शिक्षां प्रवक्ष्यामि हरिः ओम् ।

हरिः ओम् अथातः सामयाचारिकान् धर्मान् व्याख्यास्यामः । धर्मज्ञसमयः प्रमाणं वेदाश्च चत्वारो वर्णाः हरिः ओम् ।

हरिः ओम् अथ वर्णसमाम्नायः । अथ नवादितः समानाक्षराणि । द्वे द्वे सवर्णे ह्रस्वदीर्घे । नप्लुतपूर्वन् । षोडशादितः स्वराः शेषः व्याञ्जनानि हरिः ओम् ।

हरिः ओम् अइउण् । ऋलृक् । एओङ् । ऐऔच् । हयवरट् । लण् । ञमङणनम् । झभञ् । घढधष् । जबगडदश् । ख फ छ ठ थ चटतव् । कपय्। शषसर् । हल् इति माहेश्वराणि सूत्राणि अणादिसंज्ञार्थानि । वृद्धिरादैच् । अदेङ्गुणः हरिः ओम् ।

हरिः ओम् गीर्णश्रेयः । धेनवः श्रीः । रुद्रस्तु नम्यः । भगोहि याज्या । धन्योयं नारी । धनवान् पुत्रः हरिः ओम् ।

हरिः ओम् अथातः छन्दसां विवृत्तिं व्याख्यास्यामः हरिः ओम्

हरिः ओम् अथातः धर्मजिज्ञासा हरिः ओम्

हरिः ओम् अथातः ब्रह्मजिज्ञासा हरिः ओम्

हरिः ओम् आभीर्गीर्भिः यदतोन ऊनं आप्यायय हरिवः वर्धमानः । यदा स्तोतृभ्यः महिगोत्रा रुजासि भूयिष्ठभाजः अधतेस्याम । ब्रह्म प्रावादिष्म तन्नो माहासीत् । ओम् शान्ति शान्तिः शान्तिः । हरिः ओम् ।

गायत्री जपसङ्कल्पम्

आचम्य, पवित्रपाणिः । शुक्लाम् ...... शान्तये | ओम् भूः ...... सुवरोम् | ममोपात्त ...... प्रीत्यर्थम् | शुभे शोभने मुहूर्ते आद्यब्रह्मणः द्वितीय परार्धे श्वेत वराह कल्पे वैवस्वत मन्वन्तरे, अष्टाविंशति तमे, कलियुगे, प्रथमे पादे जम्बूद्वीपे भारत वर्षे भरतकण्ठे मेरोः दक्षिणे पार्श्वे शकाब्दे अस्मिन् वर्तमाने व्यावहारिके प्रभवादि षष्ठि सम्वत्सराणां मध्ये **हेमलम्ब नाम सम्वत्सरे दक्षिणायने ग्रीष्मऋतौ श्रावण मासे कृष्ण पक्षे प्रथमायां शुभतितौ भौमवासर युक्तायां श्रविष्ठा नक्षत्र युक्तायां सौभाग्य नाम योग बालव करण युक्तायां एवङ्गुण विशेषण विशिष्टायां अस्यां प्रथमायां** मिथ्यातीत प्रायश्चित्तार्थं दोषवत्सु अपतनीय प्रायश्चित्तार्थं संवत्सर प्रायश्चित्तार्थञ्च अष्टोत्तर सहस्र सङ्ख्यया गायत्री महामन्त्रजपं करिष्ये ।।